## उमोर्णयोर्वा । (१५८/१५३६)

उमाशब्दाद् ऊर्णाशब्दाच्च वा वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । औमकम्, [1]औमम् । और्णकम्, [2]और्णम् ॥

## एण्या ढञ् । (१५९/१५३७)

एणीशब्दाद् ढञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । प्राण्यञोऽपवादः । ऐणेयम् मांसम् । पुंसस्तु अञ् एव भवति । एणस्य मांसम् ऐणम्[3] ॥

## गोपयसोर्यत् । (१६०/१५३८)

[4]गोपयस्शब्दाभ्यां यत् प्रत्ययो भवति विकारावयवयोरर्थयोः । गव्यम् । पयस्यम् । सर्वत्र गोरजादि-[5]प्रसङ्गे यद् अस्त्येव, मयड्विषये [6]तु विधीयते ॥

## द्रोश्च । (१६१/१५३९)

द्रुशब्दाद् यत् प्रत्ययो भवति विकारावयवयोरर्थयोः । ओरञोऽपवादः । [7]द्रव्यम् ॥

## माने वयः । (१६२/१५४०)

द्रुशब्दान् माने विकारविशेषे वयः प्रत्ययो भवति । यतोऽपवादः । द्रुवयम्[8] ॥

## फले लुक् । (१६३/१५४१)

विकारावयवयोरुत्पन्नस्य[9] फले [10]तद्विषये विवक्षिते लुग् भवति । आमलक्याः फलम् आमलकम् । [11]कुवलम् । [12]बदरम् । फलितस्य वृक्षस्य फलमवयवो भवति विकारश्च, पल्लवितस्येव पल्लवः ॥

## प्लक्षादिभ्योऽण् । (१६४/१५४२)

फले इत्येव । प्लक्षादिभ्यः प्रातिपदिकेभ्यः फले विकारावयवत्वेन विवक्षिते अण् प्रत्ययो भवति । [13]अञोऽपवादः । विधानसामर्थ्यात् [14]तस्य न लुग् भवति । [15]प्लाक्षम् । नैयग्रोधम् ।

प्लक्ष । न्यग्रोध । अश्वत्थ । इङ्गुदी । [16]शिग्रु । [17]कर्कन्धु । बृहती । प्लक्षादिः ॥

---

1. औमम् नास्ति ब. 2. और्ण्यम् ह. 3. कोशात् ढञ् वक्तव्यः । कौशेयं वासः सूत्रं च इत्यधिकम् क.इ. 4. गोपयस् इत्येताभ्याम् फ. 5. प्रत्ययप्रसङ्गे यत् वक्तव्यः इति फ. इ. 6. तु नास्ति फ. 7. नास्ति फ, द्रव्या खट्वा ग. 8. मानं इत्यधिकम् इ. फ, प्रतानम् इत्यधिकम् ह, द्रुवयः ब. क. 9. प्रत्ययस्य इत्यधिकम् ड. 10. तद्विशेषे पमं. 11. कुवलयम् क. 12. बदर्याः विकारः फलं वा बदरम् क. ड. 13. अञोऽपवादः नास्ति ड. 14. अस्य फ. 15. प्लक्षस्य फलम् इत्यधिकम् ड. 16. सरग्रु फ. 17. कक्ष्यतु बृहन्ती ड.